# Atmanatha Stuti Vishnukrita

# आत्मनाथस्तुतिः विष्णुकृता

## Document Information

Text title : Atmanatha Stuti 1

File name : AtmanAthastutiH.itx

Category : shiva, stuti

Location : doc_shiva

Proofread by : Aruna Narayanan

Description/comments : From Atmanatha Stuti Manjari, Ed. S. V. Radhakrishna Sastri

Latest update : December 12, 2022

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 22, 2022

*sanskritdocuments.org*

# आत्मनाथस्तुतिः विष्णुकृता

अणीयांसमाद्यं महीयांसमीशं
हृदन्तस्सरोजान्तरस्थं तटस्थम् ।
अनन्तं ह्यचिन्त्यं विचिन्त्यस्वरूपं
सदा कुन्दमूलेश्वरं सन्नमामि ॥ १

सदानन्दकन्दं चिदानन्दमूलं
महानन्दरूपं महेशं गिरीशम् ।
अगम्यं हि तर्कैः सुगम्यं मुनीन्द्रैः
सदा कुन्दमूलेश्वरं सन्नमामि ॥ २॥

प्रपञ्चातिरिक्तं प्रपञ्चस्वरूपं
जगत्प्राणरूपं जगत्त्राणधीरम् ।
स्वकुक्षिस्थलोकं जगत्साक्षिणं तं
सदा कुन्दमूलेश्वरं सन्नमामि ॥ ३॥

निराकारमच्छं निरीहैर्निरीक्ष्यं
निजं निर्मतं निर्मलं धर्मरूपम् ।
निराकारमोङ्कारमाद्यं ह्यभेद्यं
सदा कुन्दमूलेश्वरं सन्नमामि ॥ ४॥

समस्तं समाकृष्य लीनं च काले
विसृज्याथ सर्वं यथावत्सृजन्तम् ।
हृदन्तः प्रविश्याथ सर्वं नटन्तं
सदा कुन्दमूलेश्वरं सन्नमामि ॥ ५॥

गुणातीतमीड्यं गुणानां निदानं
जगन्मूलकन्दं जगद्देशिकं तम् ।
भुजङ्गेशहारं त्रयीसारसारं
सदा कुन्दमूलेश्वरं सन्नमामि ॥ ६॥

वहन्तं करैर्वह्निसृक्पुस्तकानि
भुजङ्गं वरं चाभयं दोः स्थलैश्च ।
चतुर्भिस्त्रिणेत्रान्वितं दक्षिणास्यं
सदा कुन्दमूलेश्वरं सन्नमामि ॥ ७॥

विशुद्धं प्रसिद्धं त्वसिद्धातिदूरं
विशुद्धान्तरङ्गे सदा संवसन्तम् ।
नितान्तं नटन्तं कृतान्तं हरं तं
सदा कुन्दमूलेश्वरं सन्नमामि ॥ ८॥

वटस्थं वरिष्ठं दृढस्थं गरिष्ठं
कुलीनं धुरीणं प्रवीणं पुराणम् ।
सुमोदं सुनादं सुवेदैकवादं
सदा कुन्दमूलेश्वरं सन्नमामि ॥ ९॥

सदानन्दसम्पूर्णमोदावहं तं
हरिप्रोक्तमीशस्य रत्नस्तवं यः ।
सकृद्वापि यत्र स्थितो वापि मर्त्यः
पठेद्भक्तितः सच्चिदानन्दभाग् स्यात् ॥ १०॥

इति श्रीविष्णुकृता आत्मनाथस्तुतिः समाप्ता ।

Proofread by Aruna Narayanan

Tirupperunthurai (also called the Athmanathaswamy temple) is located in Avudaiyarkoil village, near Aranthangi in the Pudukkottai district of Tamil Nadu. It was built to honor Lord Shiva. The presiding deity is formless (Atmanatar); there is no Śivalingam but only a pedestal (AvudayAr) located in the sanctum, hence the name Avudayar Koil. The God faces South in this temple- in Dakshinamurthy or Guru form. His consort is worshipped as SivayoganAyaki (YogAmbAl) in iconless form. There is no

Nandi bull icon as is conventional in almost all Shiva temples.

There is deep spiritual significance in this. Hinduism allows deity worship for the novice. As one's devotion matures, one begins to contemplate the truth of formlessness of the Brahman. The temple has been designed to illustrate this theology. This one of the rarest Saivite shrines in whole of India to portray the supreme truth symbolically. Since the soul (athma) has no form, the deity is called Athmanathar.

Legend has it that Manickavasagar, one of the four Saivite savants, constructed the temple at Avudaiyarkoil.

*Atmanatha Stuti Vishnukrita*
pdf was typeset on December 22, 2022

Please send corrections to *sanskrit@cheerful.com*